श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# श्रीमद्वाल्मीकीयरामायणम्

## ॥ सुन्दरकाण्डम् ॥

## सप्तपञ्चाशः सर्गः

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the Wikner font.

श्रीः

श्रीसीतारामाभ्यां नमः

श्रीमते रामानुजाय नमः

# ॥ सुन्दरकाण्डम् ॥

## सप्तपञ्चाशः सर्गः

*समुद्रमुल्लङ्घ्य हनुमतो जाम्बवदङ्गदप्रभृतिभिः सुहृद्भिः सह समागमः*

आप्लुत्य च महावेगः पक्षवानिव पर्वतः।
भुजङ्गयक्षगन्धर्वप्रबुद्धकमलोत्पलम्॥ ५.५७.१ ॥

स चन्द्रकुमुदं रम्यं सार्ककारण्डवं शुभम्।
तिष्यश्रवणकादम्बमभ्रशैवलशाद्वलम्॥ ५.५७.२ ॥

पुनर्वसुमहामीनं लोहिताङ्गमहाग्रहम्।
ऐरावतमहाद्वीपं स्वातीहंसविलासितम्॥ ५.५७.३ ॥

वातसङ्घातजालोर्मिचन्द्रांशुशिशिराम्बुमत्।
हनूमानपरिश्रान्तः पुप्लुवे गगनार्णवम्॥ ५.५७.४ ॥

ग्रसमान इवाकाशं ताराधिपमिवोल्लिखन्।
हरन्निव सनक्षत्रं गगनं सार्कमण्डलम्॥ ५.५७.५ ॥

अपारमपरिश्रान्तश्चाम्बुधिं समगाहत।
हनूमान् मेघजालानि विकर्षन्निव गच्छति॥ ५.५७.६ ॥

पाण्डरारुणवर्णानि नीलमाञ्जिष्ठकानि च।
हरितारुणवर्णानि महाभ्राणि चकाशिरे॥ ५.५७.७ ॥

प्रविशन्नभ्रजालानि निष्क्रमंश्च पुनः पुनः।
प्रकाशश्चाप्रकाशश्च चन्द्रमा इव दृश्यते॥ ५.५७.८ ॥

विविधाभ्रघनापन्नगोचरो धवलाम्बरः।
दृश्यादृश्यतनुर्वीरस्तथा चन्द्रायतेऽम्बरे॥ ५.५७.९ ॥

www.prapatti.com

ताक्ष्यार्यमाणो गगने स बभौ वायुनन्दनः।
दारयन् मेघवृन्दानि निष्पतंश्च पुनः पुनः॥ ५.५७.१० ॥

नदन् नादेन महता मेघस्वनमहास्वनः।
प्रवरान् राक्षसान् हत्वा नाम विश्राव्य चात्मनः॥ ५.५७.११ ॥

आकुलां नगरीं कृत्वा व्यथयित्वा च रावणम्।
अर्दयित्वा महावीरान् वैदेहीमभिवाद्य च॥ ५.५७.१२ ॥

आजगाम महातेजाः पुनर्मध्येन सागरम्।
पर्वतेन्द्रं सुनाभं च समुपस्पृश्य वीर्यवान्॥ ५.५७.१३ ॥

ज्यामुक्त इव नाराचो महावेगोऽभ्युपागमत्।
स किञ्चिदारात् सम्प्राप्तः समालोक्य महागिरिम्॥ ५.५७.१४ ॥

महेन्द्रं मेघसङ्काशं ननाद स महाकपिः।
स पूरयामास कपिर्दिशो दश समन्ततः॥ ५.५७.१५ ॥

नदन् नादेन महता मेघस्वनमहास्वनः।
स तं देशमनुप्राप्तः सुहृद्दर्शनलालसः॥ ५.५७.१६ ॥

ननाद सुमहानादं लाङ्गूलं चाप्यकम्पयत्।
तस्य नानद्यमानस्य सुपर्णचरिते पथि॥ ५.५७.१७ ॥

फलतीवास्य घोषेण गगनं सार्कमण्डलम्।
ये तु तत्रोत्तरे कूले समुद्रस्य महाबलाः॥ ५.५७.१८ ॥

पूर्वं संविष्ठिताः शूरा वायुपुत्रदिदृक्षवः।
महतो वायुनुन्नस्य तोयदस्येव निःस्वनम्।
शुश्रुवुस्ते तदा घोषमूरुवेगं हनूमतः॥ ५.५७.१९ ॥

ते दीनमनसः सर्वे शुश्रुवुः काननौकसः।
वानरेन्द्रस्य निर्घोषं पर्जन्यनिनदोपमम्॥ ५.५७.२० ॥

निशम्य नदतो नादं वानरास्ते समन्ततः।
बभूवुरुत्सुकाः सर्वे सुहृद्दर्शनकाङ्क्षिणः॥ ५.५७.२१ ॥

जाम्बवान् स हरिश्रेष्ठः प्रीतिसंहृष्टमानसः।
उपामन्त्र्य हरीन् सर्वानिदं वचनमब्रवीत्॥ ५.५७.२२ ॥

सर्वथा कृतकार्योऽसौ हनूमान् नात्र संशयः।
न ह्यस्याकृतकार्यस्य नाद एवंविधो भवेत्॥ ५.५७.२३ ॥

तस्य बाहूरुवेगं च निनादं च महात्मनः।
निशम्य हरयो हृष्टाः समुत्पेतुर्यतस्ततः॥ ५.५७.२४ ॥

ते नगाग्रान्नगाग्राणि शिखराच्छिखराणि च।
प्रहृष्टाः समपद्यन्त हनूमन्तं दिदृक्षवः॥ ५.५७.२५ ॥

ते प्रीताः पादपाग्रेषु गृह्य शाखामवस्थिताः।
वासांसि च प्रकाशानि समाविध्यन्त वानराः॥ ५.५७.२६ ॥

गिरिगह्वरसंलीनो यथा गर्जति मारुतः।
एवं जगर्ज बलवान् हनूमान् मारुतात्मजः॥ ५.५७.२७ ॥

तमभ्रघनसङ्काशमापतन्तं महाकपिम्।
दृष्ट्वा ते वानराः सर्वे तस्थुः प्राञ्जलयस्तदा॥ ५.५७.२८ ॥

ततस्तु वेगवान् वीरो गिरेर्गिरिनिभः कपिः।
निपपात गिरेस्तस्य शिखरे पादपाकुले॥ ५.५७.२९ ॥

हर्षेणापूर्यमाणोऽसौ रम्ये पर्वतनिर्झरे।
छिन्नपक्ष इवाकाशात् पपात धरणीधरः॥ ५.५७.३० ॥

ततस्ते प्रीतमनसः सर्वे वानरपुङ्गवाः।
हनूमन्तं महात्मानं परिवार्योपतस्थिरे॥ ५.५७.३१ ॥

परिवार्य च ते सर्वे परां प्रीतिमुपागताः।
प्रहृष्टवदनाः सर्वे तमागतमुपागमन्॥ ५.५७.३२ ॥

उपायनानि चादाय मूलानि च फलानि च।
प्रत्यर्चयन् हरिश्रेष्ठं हरयो मारुतात्मजम्॥ ५.५७.३३ ॥

विनेदुर्मुदिताः केचित् केचित् किलकिलां तथा।
हृष्टाः पादपशाखाश्च आनिन्युर्वानरर्षभाः॥ ५.५७.३४ ॥

हनुमांस्तु गुरून् वृद्धाञ्जाम्बवत्प्रमुखांस्तदा।
कुमारमङ्गदं चैव सोऽवन्दत महाकपिः॥ ५.५७.३५ ॥

स ताभ्यां पूजितः पूज्यः कपिभिश्च प्रसादितः।
दृष्टा देवीति विक्रान्तः सङ्क्षेपेण न्यवेदयत्॥ ५.५७.३६ ॥

निषसाद च हस्तेन गृहीत्वा वालिनः सुतम्।
रमणीये वनोद्देशे महेन्द्रस्य गिरेस्तदा॥ ५.५७.३७ ॥

हनूमानब्रवीत् पृष्टस्तदा तान् वानरर्षभान्।
अशोकवनिकासंस्था दृष्टा सा जनकात्मजा॥ ५.५७.३८ ॥

रक्ष्यमाणा सुघोराभी राक्षसीभिरनिन्दिता।
एकवेणीधरा बाला रामदर्शनलालसा॥ ५.५७.३९ ॥

उपवासपरिश्रान्ता मलिना जटिला कृशा।
ततो दृष्टेति वचनं महार्थममृतोपमम्॥ ५.५७.४० ॥

निशम्य मारुतेः सर्वे मुदिता वानराभवन्।
क्ष्वेडन्त्यन्ये नदन्त्यन्ये गर्जन्त्यन्ये महाबलाः॥ ५.५७.४१ ॥

चक्रुः किलिकिलामन्ये प्रतिगर्जन्ति चापरे।
केचिदुच्छ्रितलाङ्गूलाः प्रहृष्टाः कपिकुञ्जराः॥ ५.५७.४२ ॥

आयताञ्चितदीर्घाणि लाङ्गूलानि प्रविव्यधुः।
अपरे च हनूमन्तं श्रीमन्तं वानरोत्तमम्॥ ५.५७.४३ ॥

आप्लुत्य गिरिशृङ्गेषु संस्पृशन्ति स्म हर्षिताः।
उक्तवाक्यं हनूमन्तमङ्गदस्तु तदाब्रवीत्॥ ५.५७.४४ ॥

सर्वेषां हरिवीराणां मध्ये वाचमनुत्तमाम्।
सत्त्वे वीर्ये न ते कश्चित् समो वानर विद्यते॥ ५.५७.४५ ॥

यदवप्लुत्य विस्तीर्णं सागरं पुनरागतः।
जीवितस्य प्रदाता नस्त्वमेको वानरोत्तम॥ ५.५७.४६ ॥

त्वत्प्रसादात् समेष्यामः सिद्धार्था राघवेण ह।
अहो स्वामिनि ते भक्तिरहो वीर्यमहो धृतिः॥ ५.५७.४७ ॥

दिष्ट्या दृष्टा त्वया देवी रामपत्नी यशस्विनी।
दिष्ट्या त्यक्ष्यति काकुत्स्थः शोकं सीतावियोगजम्॥ ५.५७.४८ ॥

ततोऽङ्गदं हनूमन्तं जाम्बवन्तं च वानराः।
परिवार्य प्रमुदिता भेजिरे विपुलाः शिलाः॥ ५.५७.४९ ॥

उपविष्टा गिरेस्तस्य शिलासु विपुलासु ते।
श्रोतुकामाः समुद्रस्य लङ्घनं वानरोत्तमाः॥ ५.५७.५० ॥

दर्शनं चापि लङ्कायाः सीताया रावणस्य च।
तस्थुः प्राञ्जलयः सर्वे हनूमद्वदनोन्मुखाः॥ ५.५७.५१ ॥

तस्थौ तत्राङ्गदः श्रीमान् वानरैर्बहुभिर्वृतः।
उपास्यमानो विबुधैर्दिवि देवपतिर्यथा॥ ५.५७.५२ ॥

हनूमता कीर्तिमता यशस्विना
तथाऽङ्गदेनाङ्गदनद्धबाहुना।
मुदा तदाध्यासितमुन्नतं मह-
न्महीधराग्रं ज्वलितं श्रियाभवत्॥ ५.५७.५३ ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे सप्तपञ्चाशः सर्गः॥